रचनं यस्मात्। यद्वा, चित्रं विचित्रं गुप्तं धर्म्मस्य रचनं यस्य।) चतुर्द्दशयमान्तर्गतयमः। तस्य लेखकः। इति मेदिनी। जे, १८८॥ तस्योत्पत्तिर्यथा,—

"ब्रह्मपादाग्रतः शूद्रमसीशौ द्वौ बभूवतुः।
एको मसीशः सर्व्वाख्यः सर्व्वाणीहृदयद्विजात्॥
कुलप्रदीपः स्वीयानां जातीनां पूततामृहः।
वगलेति महाविद्यां गृहीत्वा साधयन् मुदा॥
सर्व्वाणीहृदयाख्यस्य पण्डितस्य प्रसादतः।
वरं याचितवान् भक्त्या त्रिलोकाधिपतिं, गुरो!॥
कृपया कुरु मां नाथ! त्वमेव वगला मम।
गुरुणापि वरो दत्तो राज्यं भुक्त्वा पुनर्भवान्॥
त्रिलोकाधिपतिर्भूत्वा सदा तत्र सुखिष्यति।
गुर्व्वाज्ञया मसीशः स राज्यभोगी द्विजार्च्चनात्॥
विहाय देहं भूयश्च त्रिधारूपो बभूव ह।
चित्रगुप्तश्चित्रसेनश्चित्राङ्गद इति त्रयः॥
स्वर्गे मर्त्ये च पाताले राजते चिरसत्तमः।
चित्रगुप्तो महाविद्यां प्राप्य कृष्णाख्यविप्रतः॥
पुत्त्रान् याचितवान्नैव गुरोर्द्दैवत्वमावहन्।
यमान्तिको बभूवापि स्वर्मर्त्त्याधोविवेचकः॥
चिरं शुभाशुभं कर्म्म विविच्य भ्रमनान्तिके।
यद्वदेत् सकलानान्तु तदेवाभोजयेद्यमः॥"

इत्याचारनिर्णयतन्त्रम्॥

अस्योत्पत्त्यन्तरं कायस्थशब्दे द्रष्टव्यम्॥

चित्रजल्पः, पुं, (चित्रो मनोहरो जल्पः।) वाक्यविशेषः। तल्लक्षणादिर्यथा,—

"प्रेष्ठस्य सुहृदा लोके गूढ़रोषाभिजृम्भितः।
भूरिभावमयो जल्पो यत्तीव्रोत्कण्ठितान्तिमः॥
चित्रजल्पो दशाङ्गोऽयं प्रजल्पः परिजल्पितम्।
विजल्पो जल्पसंजल्पावबजल्पोऽभिजल्पितम्॥
आजल्पः प्रतिजल्पश्च सुजल्पश्चेति कीर्त्तितः।
एष भ्रमरगीताख्यो दशमे प्रकटीकृतः॥
असद्भावाद्वैचित्री चमत्कृतिसुदुस्तरः।
अपि चेच्चित्रजल्पोऽयं मनाक् तदपि कथ्यते॥
तत्र प्रजल्पः।
असूयेर्ष्यामदयुजा योऽवधीरणमुद्रया।
प्रियस्याकौशलोद्गारः प्रजल्पः स तु कीर्त्त्यते॥
यथा,—
मधुप! कितवबन्धो! मा स्पृशाङ्घ्रिं सपत्न्याः
कुचविलुलितमालाकुङ्कुमश्मश्रुभिर्नः।
वहतु मधुपतिस्तन्मानिनीनां प्रसादं
यदुसदसि विडम्ब्यं यस्य दूतस्त्वमीदृक्॥ १॥
अथ परिजल्पितम्।
प्रभोर्निर्दयताशाठ्यचापलाद्युपपादनात्।
स्वविचक्षणताव्यक्तिर्भङ्ग्या स्यात् परिजल्पितम्॥
यथा,—
सकृदधरसुधां स्वां मोहिनीं पाययित्वा
सुमनस इव सद्यस्तत्यजेऽस्मान् भवादृक्।
परिचरति कथं तत्पादपद्मं नु पद्मा
अपि वत हृतचेता ह्युत्तमश्लोकजल्पैः॥ २॥
अथ विजल्पः।
व्यक्तयासूयया गूढ़मानमुद्रान्तरालया।
अघद्विषि कटाक्षोक्तिर्विजल्पो विदुषां मतः॥
यथा,—
किमिह बहु षडङ्घ्रे! गायसि त्वं यदूना-
मधिपतिमगृहाणामग्रतो नः पुराणम्।
विजयसखसखीनां गीयतां तत्प्रसङ्गः
क्षपितकुचरुजस्ते कल्पयन्तीष्टमिष्टाः॥ ३॥
अथोज्जल्पः।
हरेः कुहकताख्यानं गर्व्वगर्भितयेर्ष्यया।
सासूयश्च तदाक्षेपो धीरैरुज्जल्प ईर्य्यते॥
यथा,—
दिवि भुवि च रसायां काः स्त्रियस्तद्दुरापाः
कपटरुचिरहासभ्रूविजृम्भस्य याः स्युः।
चरणरज उपास्ते यस्य भूतिर्व्वयं का
अपि च कृपणपक्षे ह्युत्तमश्लोकशब्दः॥ ४॥
अथ संजल्पः।
सोल्लुण्ठया गहनया कयाप्याक्षेपमुद्रया।
तस्याकृतज्ञताद्युक्तिः संजल्पः कथितो बुधैः॥
यथा,—
विसृज शिरसि पादं वेद्म्यहं चाटुकारै-
रनुनयविदुषस्तेऽभ्येत्य दौत्यैर्मुकुन्दात्।
स्वकृत इह विसृष्टापत्यपत्यन्यलोका
व्यसृजदकृतचेताः किन्नु सन्धेयमस्मिन्॥ ५॥
अथ अवजल्पः।
हरौ काठिन्यकामित्वधौर्त्त्यादासक्त्ययोग्यता।
यत्र सेर्ष्याभियेवोक्ता सोऽवजल्पः सतां मतः॥
यथा,—
मृगयुरिव कपीन्द्रं विव्यधे लुब्धधर्म्मा
स्त्रियमकृतविरूपां स्त्रीजितः कामयानाम्।
बलिमपि बलिमत्त्वावेष्टयद्ध्वाङ्क्षवद्य-
स्तदलमसितसख्यैर्दुस्त्यजस्तत्कथार्थः॥ ६॥
अथाभिजल्पितम्।
भङ्ग्या त्यागौचितं तस्य खगानामपि खेदनात्।
यत्र सानुशयं प्रोक्तं तद्भवेदभिजल्पितम्॥
यथा,—
यदनुचरितलीलाकर्णपीयूषविप्रुट्-
सकृददनविधूतद्वन्द्वधर्म्मा विनष्टाः।
सपदि गृहकुटुम्बं दीनमुत्सृज्य दीना
बहव इव विहङ्गा भिक्षुचर्य्यां चरन्ति॥ ७॥
अथ आजल्पः।
जैह्म्यं तस्यार्त्तिदत्वञ्च निर्व्वेदाद्यत्र कीर्त्तितम्।
भङ्ग्यान्यसुखदत्वञ्च स आजल्प उदीरितः॥
यथा,—
वयमृतमिव जिह्मव्याहृतं श्रद्दधानाः
कुलिकरुतमिवाज्ञाः कृष्णवध्वो हरिण्यः।
ददृशुरसकृदेतत्तन्नखस्पर्शतीव्र-
स्मररुजमुपमन्त्रिन्! भण्यतामन्यवार्त्ता॥ ८॥
अथ प्रतिजल्पः।
दुस्त्यजद्वन्द्वभावेऽस्मिन् प्राप्तिर्नार्हेत्यनुद्धतम्।
दूतसम्माननेनोक्तं यत्र स प्रतिजल्पकः॥
यथा,—
"प्रियसख! पुनरागाः प्रेयसा प्रेषितः किं
वरय किमनुरुन्धे माननीयोऽसि मेऽङ्ग!।
नयसि कथमिहास्मान् दुस्त्यजद्वन्द्वपार्श्वं
सततमुरसि सौम्य! श्रीवधूः साकमास्ते॥ ९॥
अथ सुजल्पः।
यत्रार्जवात् सगाम्भीर्य्यं सदैन्यं सहचापलम्।
सोत्कण्ठञ्च हरिः पृष्टः स सुजल्पो निगद्यते॥
यथा,—
अपि वत! मधुपुर्य्यामार्य्यपुत्त्रोऽधुनास्ते
स्मरति स पितृगेहान्! सौम्यबन्धूंश्च गोपान्।
क्वचिदपि स कथां नः किङ्करीणां गृणीते
भुजमगुरुसुगन्धं मूर्द्ध्न्यधास्यत् कदा नु॥"१०॥

इत्युज्ज्वलनीलमणौ स्थायिभावः॥

चित्रतण्डुलं, क्ली, (चित्रो विचित्रस्तण्डुलो यस्य।) विडङ्गम्। इति रत्नमाला॥

चित्रतण्डुला, स्त्री, (चित्रो नानावर्णस्तण्डुलो यस्याः।) विड़ङ्गम्। इत्यमरः। २।४।१०६॥ (यथास्याः पर्य्यायाः।
"पुंसि क्लीवे विडङ्गः स्यात् कृमिघ्नो जन्तुनाशनः।
तण्डुलश्च तथा वेल्लममोघा चित्रतण्डुला॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

चित्रत्वक्, [च्] पुं, (चित्रा विचित्रा त्वक् यस्य।) भूर्जवृक्षः। इति राजनिर्घण्टः॥

चित्रदण्डकः, पुं, (चित्रो विचित्रो दण्डो यस्य। इति कप्।) ओलवृक्षः। इति रत्नमाला॥

चित्रदेवी, स्त्री, (चित्रं दीव्यतीति। दिव्+अच्। गौरादित्वात् ङीष्।) महेन्द्रवारुणी। इति राजनिर्घण्टः॥

चित्रनेत्रा, स्त्री, (चित्रे मनोज्ञे नेत्रे यस्याः।) सारिकापक्षी। इति हारावली। ८८॥

चित्रपक्षः, पुं, (चित्रौ विचित्रौ पक्षौ यस्य।) तित्तिरिपक्षी। इति जटाधरः॥

चित्रपत्रिका, स्त्री, (चित्राणि विचित्राणि पत्राणि पर्णानि यस्याः। कापि अत इत्वम्।) कपित्थपर्णीवृक्षः। इति रत्नमाला॥ द्रोणपुष्पी। इति राजनिर्घण्टः॥

चित्रपत्री, स्त्री, (चित्राणि पत्राणि यस्याः। गौरादित्वात् ङीष्।) जलपिप्पली। इति राजनिर्घण्टः॥

चित्रपदा, स्त्री, (चित्रं पदं यस्याः।) गोधापदीलता। इति शब्दमाला॥ छन्दोभेदः। इति छन्दोमञ्जरी॥ अस्य लक्षणादि छन्दःशब्दे द्रष्टव्यम्॥ (चित्रं पदं वस्तुविन्यासो यस्य यत्र वा इति विग्रहे विचित्रपदयुक्ते त्रि। यथा, महाभारते। ३।३१।१।
"वल्गु चित्रपदं श्लक्ष्णं याज्ञसेनि! त्वया वचः।
उक्तं तत् श्रुतमस्माभिर्नास्तिक्यन्तु प्रभाससे॥")

चित्रपर्णिका, स्त्री, (चित्राणि पर्णानि पत्राणि यस्याः। कापि अत इत्वम्।) चित्रपर्णीभेदः। तत्पर्य्यायः। दीर्घा २ शृगालविन्ना ३ चित्रपर्णी ४ सिंहपुच्छिका ५ दीर्घपत्रा ६ अतिगुहा ७ पृष्णिका ८। इति रत्नमाला॥

चित्रपर्णी, स्त्री, (चित्राणि पर्णानि यस्याः। गौरादित्वात् ङीष्।) पृश्निपर्णी। इत्यमरः।